श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीभगवन्महर्षिरमणान्तेवासिनो वासिष्ठस्य नरसिंहसूनोर्गणपतेः कृतिषु

# ॥ श्री नृसिंहपञ्चरत्नम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री नृसिंहपञ्चरत्नम् ॥

घटिकाचलमालयमादधता
    शरणागतरक्षणमाचरता।
करुणाकलितेन जगत्पतिना
    न विना मम याति मुदं हृदयम् ॥ 1 ॥

वसतिं कुरुषे घटिकाद्रिवरं
    हृदयं च मदीयमदस्सदय।
नरसिंह विहाय विभो कपटं
    वद कुत्र मनो भवतो रमते ॥ 2 ॥

घटिकाचलवासिनमीशमजं
    सततं स्मरतां क्व सतामशुभम्।
यदि कोऽपि भवेदशुभस्य लवो
    रुचिराशिरुदेष्यति पाशि दिशि ॥ 3 ॥

बहवोऽवतरा विलसन्तु मधुं
    द्विषतो निजविग्रहतोऽप्यधिकम्।
घटिकागिरिराड्वसतौ नृहरौ
    करुणावति मे रमते हृदयम् ॥ 4 ॥

चरणागतान्परमसात्त्विकान् ऋषीन्
    करुणावलोकनिकरेण लालयन्।

घटिकाद्रिसीमनि नृसिंहविग्रहो
जगतां पतिर्वसति वासवार्चितः ॥ 5 ॥

॥ श्री नृसिंहपञ्चरत्नं समाप्तम् ॥